**E-ISSN-2584-2870** **DOI: https://doi.org/10.65833/dbs.2026.006**

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# माधुर्य्यरसालोकेन श्रीगीतगोविन्दकाव्यम्- एकमध्ययनम्

**सुशोभनसिंहमहापात्रः**
**शोधच्छात्रः**
**केन्द्रीय-संस्कृत-विश्वविद्यालयः**
**श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः**
**अणुवाक्संख्या- susobhansinhamahapatra@gmail.com**

**शोधसारः**

अनेके वैष्णवसाहित्यिकाः स्वस्मिन् ग्रन्थे मधुरमपि रसत्वेनाङ्गीकृतवन्तः। यद्यपीयं धारा श्रीजयदेवकालादेव वा तत्पूर्वतः एव प्रचलितासीत्। तथापि गौडीयवैष्णवदार्शनिकाः विषयममुं सावधानेन विचिन्त्य श्रीकृष्णराधायाः परमोज्ज्वलमाधुर्य्यरसमण्डितग्रन्थान् लिलिखुः। तथैव अनेकेषु अलङ्कारग्रन्थेषु माधुर्य्यरसविषये समालोचनमपि विहितम्। तेषु भक्तिरसामृतसिन्धुः, उज्ज्वलनीलमणिः इत्यादयः ग्रन्थाः सुप्रसिद्धाः। तत्र रूपगोस्वामिना भक्तिरसं पञ्चधा विभाजितम्। तेषु पञ्चरसेषु माधुर्य्यः चरमः परमोत्तमः परमपुरुषार्थश्च वर्त्तते। यदुक्तं श्रीनाथचक्रवर्त्तिना चैतन्यमतमञ्जूषाग्रन्थे

"प्रेम पुमार्थो महान्"[१]

प्रस्तुतशोधपत्रे तेषु ग्रन्थेषु माधुर्य्यरसविषयकपरिचिन्तनपुरःसरं तदालोकेन गीतगोविन्दकाव्यस्यानुशीलनं विहितम्।

**कुटशब्दाः**

लीलापुरुषोत्तमः, समन्वयः, वसन्तरासः, इन्द्रप्रस्थः, अच्युतः, प्रतीकम्, अवच्छेदः, शृङ्गारः।

## भूमिका

महाभारते पुराणादौ विशेषतः श्रीमद्भागवते या गोविन्दलीला वर्णितास्ति। कविजयदेवः स्वीये गीतगोविन्दे तामेव लीलां वर्णयामास। लीलापुरुषोत्तमः श्रीगोविन्दः स्वीयया प्रेयस्या श्रीराधया सह गीतगोविन्दकाव्ये वर्णितो भवति। दशावतारस्तोत्रे एतमेव गीविन्दं कृष्णत्वेन वर्णितवान्

"दशाकृति कृते कृष्णाय तुभ्यं नमो[२]"

एतद्देशावच्छेदेन पुराणोक्तकृष्णलीलायाः धाराद्वयमेवावलोक्यते। ययोः श्रीमद्भागवत-विष्णुपुराणखिलहरिवंशपुराणानि एकपर्य्यायस्थानि तथा द्वितीयपर्य्यायस्था धारा ब्रह्मवैवर्त्तपुराणोक्तास्ति। पद्मपुराणे एतयोः धारयोः समन्वयः साधितोऽस्ति। श्रीमद्भागवतं भवति महाप्रभुप्रवर्त्तितशाखास्थानां परमप्रामाणिकः ग्रन्थः तथा उपासनास्थले तु ते पद्मपुराणमपि गृह्णन्ति। तथैव ब्रह्मवैवर्त्तपुराणस्यापि महत्त्वं तेषु न्यूनं न वर्त्तते।

जयदेवस्य वर्णनीयो विषयो भवति वसन्तरासः। रासोऽयं शारदीयरासाव्यवहितोत्तरकालावच्छेदेन नानुष्ठितः। गीतगीविन्दपाठात् ज्ञायते यत् इन्द्रप्रस्थात् प्रत्यागम्य श्रीकृष्णेनेयं लीला सम्पादिता। पद्मपुराणानुसारं युधिष्ठिरस्य राजसूययज्ञात् परं श्रीकृष्णः इन्द्रप्रस्थात् वृन्दावनमागतवानिति। श्रीमद्भागवतेऽपि अस्य संक्षिप्तविवरणं प्राप्यते। तद्यथा-

यर्ह्यम्बुजाक्षापससार भो भवान्

कुरून् मधून् वाथ सुहृद् दिदृक्षया।

तत्राब्द कोटि प्रतिमः क्षणो भवे

द्रविं विनाक्ष्णोरिव न स्तवाच्युतेति॥[३]

अस्यार्थस्तु हे कमलनयन ! भवान् यदास्मान् परित्यज्य बन्धुदर्शनाकाङ्क्षया इन्द्रप्रस्थं मथुरामण्डलञ्च गतवान्। तदानीं वयं प्रतिक्षणं कल्पवद् मन्यामहे। हे अच्युत ! सूर्य्याभावेन नयनयुगलस्य या दशा भवति तवादर्शनेनास्माकमपि सैव दशाभवत्।

## कविपरिचयः

प्रचुर भयो तिहुँ लोक गीतगोविन्द उजागर ।

कोककाव्य नवरस सरस श्रृङ्गार कौ सागर ॥

अष्टपदी अभ्यास करै तिहि बुद्धि बढावै ।

श्रीराधारवन प्रसन्न सुनन तहां निश्चै आवै ॥

सन्तसरोरुह पंड को पद्मापति सुख जनक रवि ।

जैदेव कवी नृप चक्कवै खण्डमण्डलेश्वर आन कवि ॥[४]

प्रसिद्धग्रन्थे भक्तमाले नाभागोस्वामिनायं जयदेवः कविनृपेति आख्यां प्राप्तवान् । अयं जयदेवः काव्योत्तमस्य गीतगोविन्दस्य रचयिता । अस्मात् काव्यादेव ज्ञायते यत् महाकविः जयदेवः भक्तचूडामणिः बभूव ।

यदि हरिस्मरणे सरसं मनो

यदि विलास-कलासु कुतूहलम् ।

मधुरकोमलकान्तपदावलीं

श्रृणुत तदा जयदेव-सरस्वतीम् ॥[५]

अस्य पिता भोजदेवः माता वामादेवी । प्रसिद्धिरस्ति अयं प्राग्विरक्तः आसीत् किन्तु जगन्नाथादेशवशात् ब्रह्मा स्वकन्यां अस्मै समर्पितवान् । अस्य पत्न्याः नाम पद्मावती । भक्तमालग्रन्थस्य भक्तिरसबोधिनीटीकायां गौडीयपंथमुकुटमणिः श्रीप्रियादासः जयदेवस्य जन्मस्थलप्रसङ्गे कथितवान्

किन्दबिल्ल गांव ताये भए कवि राज राज।[६]

तथापि विषयेस्मिन् अधुनाऽपि महान् विवादः वर्तते । यतो हि उत्कले बङ्गे चोभयत्र केन्दुबिल्लग्रामे स्तः । तथा उभयेषां मतं जयदेवः तेषां केन्दुबिल्लेऽजायत । भवतु यत्रापि परन्त्वयं बङ्गनृपस्य सेनकुलतिलकस्य श्रीलक्ष्मणसेनस्य सभाकविः बभूव । लक्षणसेनस्य शिलालेखे जयदेवं विहाय येषां चतुर्णां सभाकवीनां नामानि सन्ति तेषामुल्लेखं जयदेवोऽपि स्वकाव्यस्य प्रथमसर्गस्थे चतुर्थे बाचः पल्लवयत्युमापतिधरेति श्लोके कृतवान् ।जयदेवाधारिताः लोककथाधुनाऽपि बङ्गगृहेषु प्रचलिताः सन्ति । भक्तमालं विहायापि चन्द्रदत्तस्य संस्कृतभक्तमाले, वनमालीदासविरचिते जयदेवचरित्रे, जगन्नाथदासस्य भक्तचरितामृतादिग्रन्थेषु महाकविजयदेवस्य चरित्रं वर्णितमस्ति ।

**गीतगोविन्दस्य परिचयः**

गीतः स्तुतः गोविन्दः यस्मिन् काव्ये तद्गीतगोविन्दमिति व्युत्पत्या गोविन्दस्य स्तुतिपरकं काव्यं भवति गीतगोविन्दम्। तत्र महाकविः जयदेवः स्वसुन्दरवर्णनशैल्या राधाकृष्णयोः माधुर्यरसमण्डितलीलायाः वर्णनं कृतवान्। इदं तु महाकविजयदेवस्य काचित् मौलिकरचनास्ति। श्रीकृष्णचैतन्यमहाप्रभुप्रवर्तितोन्नतोज्ज्वलरसगर्भभक्तेः भृशं परिवेषणमित्यत्र दरीदृश्यते। यतो हि अत्रैव प्रथमं राधाकृष्णयोः सुललितमाधुर्यमण्डितप्रेमलीलायाः सरसं सुकोमलं च वर्णनं विद्यते। सर्वलीलामुकुटरासलीलायां श्रीगोविन्दस्य त्रैलोक्यसौभगरूपमाधुर्य्यं वेणुगीते स्थावरादीनामानन्दोन्मादनसहकृतेन अनुरागेण श्रीकृष्णं प्रति अभिसारगमनञ्चवर्णितम्। सर्वोऽपि विषयः कामबीजवत् कामगायत्र्यादिवच्च साधकहृदयमुन्मादयति। काव्यमिदं द्वादशसर्गात्मकमस्ति। प्रत्येकेषु सर्गेषु केचन श्लोकाः तथा काश्चनाष्टपद्यः वर्तन्ते। तत्र अष्टपद्यः तु प्रधानभूताः, श्लोकास्तु कथासूत्रमग्रे सारयन्ति। इत्यत्र चतुर्विंशतिगीतानि सन्ति। यानि भिन्नेषु तालरागेषु च गीयन्ते। यथा प्रथमस्थं दशावतारस्तोत्रात्मकं गीतं मालवरागेण तथा रूपकतालेन गीयते। एवमेव द्वितीये गुर्जरीरागः तथा मण्ठतालः। तद्वत् तृतीयादयः। काव्यस्यास्य प्रत्येकमपि सर्गः पृथक् नामभिः अभिधीयते। सामोददामोदरेति प्रथमः अक्लेशकेशवेति द्वितीयः एवं तृतीयादयः।

**मधुररसः**

वस्तुतः गीतगोविन्दं भवति माधुर्य्यरसप्रधानं काव्यम्। काव्येस्मिन् भगवतः श्रीरूपस्य माधुर्य्यमण्डिता वर्णना वर्त्तते। भगवतः माधुर्य्यमण्डितरूपस्य वर्णनात् प्राक् तावन्माधुर्यस्वरूपं विचार्यते। मधु राति ददातीति मधुरः। मधुरस्य भाव एवमाधुर्यमिति भावार्थे ष्यञ्प्रत्ययः। माधुर्यशब्दः मधुरता-मधुरत्वं वार्थे प्रयुज्यते। तत्र तावत् माधुर्यरसलक्षणप्रसङ्गे रूपगोस्वामिनोच्यते

वक्ष्यमाणैर्विभावाद्यैः स्वाद्यतां मधुरारतिः।

नीताभक्तिरसः प्रोक्तो मधुराख्यो मनीषिभिः॥[७]

अर्थात् वक्ष्यमाणविभावानुभावसात्विकव्यभिचार्यादिकार्यकारणसहकारिभावैः मधुरारतिः यदा आस्वादनीया भवति तदा सैव मधुरारतिः मधुराख्यभक्तिरसस्वरूपं धारयति। एतमेवार्थं प्रकटयन् तेनैव भक्तिरसामृतसिन्धोः पश्चिमविभागस्य पञ्चमलहर्य्यां वर्णितं

आत्मोचितैर्विभावाद्यैः पुष्टिं नीता सतां हृदि।

मधुराख्यो भवेद्भक्तिरसोऽसौ मधुरारतिः॥[८]

तथैव रागवर्त्मचन्द्रिकायां श्रीलविश्वनाथचक्रवर्त्ती माधुर्यस्वरूपप्रसङ्गे पूर्वपक्षीयाणां पक्षमुपस्थापयति यथा

" सर्वज्ञत्वं महैश्वर्य्यत्वमेव न तु माधुर्य्यम्। माधुर्य्यं खलु तदेव यदैश्वर्य्यं विनाभूतकेवलनरदीलत्वेन मौग्ध्यमिति स्थूलधियः कथयन्ति।"[९]

अर्थात् ये खलु स्थूलधियः वर्त्तन्ते तेषां मते तु माधुर्य्यस्य लक्षणं तावत्

ऐश्वर्य्यरहितत्वे सति नरलीलत्वम्

किन्तु नेदं मतं समीचीनम्। वस्तुतस्तु यदीत्थं स्वीकृयते चेत् कृष्णस्य वृन्दावनस्थ-पूतनावधादिषु लीलास्वतिव्याप्तिः स्यात्। अतः माधुर्य्यं तावत्

"महैश्वर्य्यस्य द्योतने वाद्योतने च नरलीलत्वानतिक्रमो माधुर्य्यमिति"[१०]विश्वनाथचक्रवर्तिनः अभिमतम्।

यथा वृन्दावने पूतनावधप्रसङ्गे श्रीकृष्णस्य स्तनपानलक्षणं मनुष्यबाललीलत्वमेव। एवमेव महाकठोरशकटः स्फुटितोऽपि अतिसुकोमलचरणकमलविशिष्टस्य उत्तानशायिनः त्रैमासिकवयस्कस्य श्रीकृष्णस्य नरलीलैव शकटासुरवधप्रसङ्गे परिस्फुटिता। अथवा दामबन्धनलीलायां महादीर्घरज्ज्वुद्वारापि यदा कृष्णः बद्धो न भवति तदा तस्य ऐश्वर्यमेव परिस्फुटो भवति। किन्तु तदैश्वर्य्यं तस्य लीलाकालीनया मातुः भीतिजनितविह्वलतया नरलीलत्वं नातिक्रमति। एवं ब्रह्मावलदेवयोः मोहनावस्थायां सर्वज्ञत्वसत्त्वेऽपि गोवत्सचारणलीला तस्य नरलीलत्वानतिक्रमति। तथैव ऐश्वर्य्यसत्त्वादपि तस्य अप्रकटनावस्थायां दधिदुग्धचौर्य-गोपरमणीलाम्पट्यरूपाः लीलाः प्रकाशिताः। किन्तु यदि केवलं ऐश्वर्य्यरहितायाः मनुष्यलीलायाः मुग्धता एव माधुर्य्यपदवाच्या भवति चेत् क्रीडाचपलस्य प्राकृतबालकस्यापि मुग्धता माधुर्य्यम्। तस्मात् माधुर्य्यस्य प्रथमं लक्षणमनुचितमिति ग्रन्थकारस्याभिप्रायः। किन्तु तदेव ऐश्वर्य्यं यत्र "नरलीलत्वस्यानपेक्षितत्वे सति ईश्वरत्वाविष्कारः"[११] यथा जन्मलीलायां मातापितरौ प्रति स्वीयचतुर्भुजरूपप्रदर्शनं वार्जुनं प्रति विश्वरूपदर्शनम्।

### माधुर्य्यरसालोकेन श्रीगीतगोविन्दम्

सम्पूर्णेऽस्मिन् काव्ये भगवतः लीलामाधुर्य्यमेव वर्णितमस्ति। तदेव साम्प्रतं वर्ण्यते।

सरसवसन्ते ब्रजवनभूमिः नन्दननिन्दिकान्तसौन्दर्येण मधुमयसुन्दरतां धारयति। यमुनास्नातसुरभिमलयस्य मन्द-आन्दोलने, विटपकुञ्जेषु व्रततीविताने, पुष्पितसोहागस्य पुलकोल्लासे, कुसुमेषु मधुकरनिकराणां झङ्कारकोलाहले, शाखासु कोकिलानां कुहुताने, गगनपवनेषु माधुर्य्यस्य घनघटायां, त्रिलोकस्य मिलनलीलायां, प्रकृतेः उत्सवसमारोहेषु राधाकृष्णयोः अप्राकृतप्रेम्णः अभिसार-विरह-मानमिलनानां सुमधुररङ्गाभिनयं नित्यनवरङ्गेणाभिनीतो भवति। तत्र काव्येऽस्मिन् मङ्गलव्याजेन कविः नन्दमुखात् श्रीकृष्णस्य मुग्धतां प्रकटयति। तत्र कविः कथयति-

गगनं मेघवत्, वनभूमिः तमालद्रुमैः श्यामलीभवत्, तदुपरि अयं रात्रिकालः। हे राधे नक्तं भीरुः मे पुत्रः। तं त्वया सह गृहं नयेति। यत्र श्रीमद्भागवतं कथयति "यं बिभेति स्वयं भयम्"[१२] प्रस्तुतकाव्ये नन्दमुखेन तस्मिन्नेव श्रीकृष्णे प्राकृतबालवत् भीरुत्वमारोपयति कविः। अत्र सर्वेश्वरस्य श्रीकृष्णस्य माधुर्य्यस्वरूपं प्रकाशितवान् कविः। तथैव काव्यस्यास्य तृतीयगीतारम्भे सखिमुखेन कविः श्रीकृष्णस्य अनेकवल्लभत्वरूपमुग्धतां प्रकटयन् कथयति-

विहरति हरिरिह सरसवसन्ते।

नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥[१३]

अस्मिन्नपि श्लोके श्रीकृष्णस्य ब्रजरमणीविहाररूपः मुग्धतायाः परिचायकः। तथैव गोपीमुखादपि भगवतः माधुर्य्यमण्डित-रूपस्य वर्णना यथा

चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली।

केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली॥[१४]

यत्र भगवतः सर्वं दिव्यमिति शास्त्राणि प्रतिपादयन्ति। एवं भगवतः धाम, आभरणादिनि सर्वाणि बलभद्रस्य अंशभूतानि सन्ति। किन्तु कविः तमप्राकृतं भगवन्तं स्वीयानुरूपं वर्णयति। यस्यां वर्णनायां भगवतः परमरमणीयमाधुर्य्यमण्डितरूपं प्रस्फुटितो भवति। सखी राधां प्रति कथयति हे राधे पीतवसनपरिहितस्य वनमालिनः नीलकलेवरः शुभ्रचन्दनचर्चितः वर्त्तते। तस्मिन् क्रीडामत्ते सति तस्य मणिमयकुण्डले दोदुल्येते। तथा तस्यां कुण्डलच्छटायां स्मितहास्योज्ज्वलकपोलयुगुलं शोभते। सः हरिः विलासमत्तब्रजवधुः नीत्वा केलिविलासे रतो वर्त्तते। अनेन वर्णनेन सह भागवतस्य दशमस्कन्धीयरूपस्य साम्यता दृश्यते-

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं

विभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम्।

रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दै

वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः॥[१५]

अत्रापि भगवतः माधुर्य्यमयरूपस्य वर्णना वर्त्तते। एवमेव गीतगोविन्दस्य द्वितीयसर्गारम्भे राधा श्रीहरेः सुमधुरं रूपं स्मरति। तत्र श्रीहरिः-

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम्।

वलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम्।।[१६]

श्रीमती राधा कस्मिंश्चिल्लताकुञ्जे उषित्वा स्वीयां सखीं कथयति हे सखि यस्य सुधामय-अधरफुत्कारेण मोहनवंशी सुमधुरध्वनौ मुखरितो भवति। इतस्ततः कटाक्षविक्षेपेण यस्य मुकुटं चञ्चलं तथा कुण्डलौ कपोलप्रान्तयोः दोदुल्यमन्तौ भवतः। सः हरिः अद्य मां परित्यज्य विलासमत्तो वर्त्तते। एवं काव्यस्य सर्वत्रैव श्रीकृष्णस्य माधुर्य्यमण्डितरूपस्य सचारुवर्णना वर्त्तते।

**सन्दर्भाः**


१. चैतन्यमतमञ्जूषा(१.१.१)

२. गीतगोविन्दम्(१.१६)

३. श्रीमद्भागवतम्-१.१०.९।

४. भक्तमाल,छप्पय 70

५. गीतगोविन्दम्,1/3

६. भक्तमाल, छप्पय 70 टीका

७. उज्ज्वलनीलमणिः, पृ.०५

८. श्रीभक्तिरसामृतसिन्धुः(प.वि. ५.१)

९. रागवर्त्मचन्द्रिका(द्वितीय.प्र.२)

१०. तत्रैव (द्वतीय.प्र.३)

११. तत्रैव (प्रथम.प्र.४)

१२. श्रीमद्भागवतम्(1१,१४)

१३. गीतगोविन्दम्( १.४०)

१४. गीतगोविन्दम्( १.४०)

१५. भागवतम्(१०.२१.४)

१६. गीतगोविन्दम्(२.२)

**सहायकग्रन्थाः**


| | | |
|---|---|---|
| १. | गीतगोविन्दम् | जयदेवः, रसिकमोहनविद्याभूषणः, नलिनीप्रेस, कोलकाता। |
| २. | चैतन्यमतमञ्जूषा | श्रीनाथचक्रवर्त्तिपादः, श्रीमत्पुरीदासः, चन्द्रनाथप्रेस्, कलिकाता, १९५५. |
| ३. | श्रीमद्भागवतम् | श्रीमन्महर्षिकृष्णद्वैपायनवेदव्यासः, श्रीजीवन्यायतीर्थः, वसुमतिसाहित्यमन्दिरम्, कलिकाता,१६६. |
| ४. | श्रीभक्तमाल | नाभागोस्वामी, ब्रजवल्लभवेदान्ताचार्यः, वृन्दावनधाम, उ.प्र. । |
| ५. | उज्ज्वलनीलमणिः | श्रीजीवगोस्वामी, श्रीरामनारायणविद्यारत्नः, अक्षयलाइब्रेरी, कोलकाता, ब.१२९५। |
| ६. | भक्तिरसामृतसिन्धुः | रूपगोस्वामी, श्रीधरदेवगोस्वामी, चैतन्यसारस्वत-कृष्णानुशीलनसङ्घः, कोलकाता,१२. |
| ७. | रागवर्त्मचन्द्रिका | विश्वनाथचक्रवर्त्ती, नारायणगोस्वामी, गौडीयवेदान्तप्रकाशनम्, वृन्दावनम्, २००९. |
| ८. | काव्यालंकारः | भामहः, Sankararamashastri, balmanora mapress, madras,1956. |
| ९. | संस्कृतशोधप्रविधिः | डॉ.सत्यनारायण आचार्यः,राष्ट्रियसंस्कृतविद्यापीठम्,तिरूपतिः,आन्ध्रप्रदेशः,२०१२। |
| १०. | गीतगोविन्दटीका(पाण्डुलिपिः) | जयदेवः, चिदानन्दभिक्षुः, भण्डारकरप्राच्यविद्याशोधसंस्थानम्, पुने, महाराष्ट्रम्। |